**दिनाङ्क :- 28.10.2025**

**प्रातः - 06:55**

## ईसी-एसआईआर :

द्वादश राज्येषु, केन्द्रशासित-प्रदेशेषु च निर्वाचनसूचीनां विशेष-गहन-पुनरीक्षणस्य द्वितीयचरणस्य आरम्भः अद्यारभ्य भविष्यति।

सूच्यांअण्डमाननिकोबारद्वीपाः, लक्षद्वीपः, छत्तीसगढः, गोवा, गुजरातः, केरलः, मध्यप्रदेशः, पुडुचेरी, राजस्थानः, तमिल नाडुः, उत्तरप्रदेशः, पश्चिमबङ्गः चैतानि राज्यानि केन्द्रशासितप्रदेशाः अन्तर्भवन्ति । ह्यः नवदिल्लीनगरे वार्ताहरान् सम्बोधयन्, मुख्यनिर्वाचन-आयुक्तः ग्यानेशकुमारः, एस.आइ.आर.इत्यस्य द्वितीयचरणस्य कार्यक्रमस्य घोषणां कृतवान्। सः अवदत्, अस्य पुनरीक्षणस्य उद्देश्यं निर्वाचनसूच्याः अधिकाधिक-पारदर्शिकीकरणं तथा त्रुटिरहितीकरणं च वर्तते। असौ प्रोक्तवान् यत्, एसआईआर इत्यस्य द्वितीयचरणे एकपञ्चाशत्-कोटिमतदातारः अन्तर्भवन्ति।

## राष्ट्रपति-सौर-घटबन्धन:

राष्ट्रपतिपदासीना द्रौपदी मुर्मू अद्य नवदिल्लीनगरे भारतमण्डपमे अन्ताराष्ट्रियसौर-घटबन्धनस्य (आईएसए) सभायाः अष्टम-सत्रस्य अवसरे मुख्यभाषणं करिष्यति । नवीन-नवीकरणीय-ऊर्जामन्त्री श्रीप्रल्हाद-जोशी अपि अद्य अस्मिन् उद्घाटनसत्रे सम्बोधनं करिष्यति । चतुर्दिवसीय-वैश्विककार्यक्रमे चतुर्विंशत्युत्तर-एकशतम् देशाः, विश्वस्य चत्वारिंशत्-तः अधिकाः मन्त्रिणः च भागं गृह्णन्ति ।

## प्रधानमन्त्री-मुम्बई

प्रधानमन्त्री श्रीनरेन्द्रमोदी श्वः मुम्बईनगरे द मेरिटाईम लीडर्स् कोन्क्लेव इत्याख्यं सम्मेलनं सम्बोधयिष्यति । अस्मिन् अवसरे सः ऐषमः भारतस्य समुद्रीय-सप्ताहस्य वैश्विक-समुद्रीय-सीईओ मञ्चस्य अध्यक्षतां अपि करिष्यति । प्रधानमन्त्रिणः सहभागिता समुद्रीय-अमृतकालदृष्टिः विंशति-सप्तचत्वारिंशत् इत्यनेन सह सङ्गतस्य महत्त्वाकांक्षां, भविष्योन्मुखस्य समुद्रीयपरिवर्तनं प्रति च तस्य गहनप्रतिबद्धतां प्रतिबिम्बयति । अस्मिन् आयोजने पञ्चाशीति-तः अधिकाः देशाः, एक-लक्षाधिक-प्रतिनिधिभिः सह पञ्चाशदुत्तर-त्रिशतम्-तः अधिकाः अन्ताराष्ट्रियवक्तारः च भागं गृहीष्यन्ति ।

## जयशंकर पूर्व एशिया शिखर सम्मेलन :

विदेशमन्त्री डॉ एस जयशंकरः, वैश्विकशान्ति-स्थिरतायाः च कृते आतङ्कवादः बृहत्तमासु बाधासु अन्यतमः इति बोधयन्, उक्तवान् यत् आतङ्कवादस्य विरुद्धं विश्वेन शून्यसहिष्णुता प्रदर्शयितव्या। ह्यः मलेशियादेशस्य कौला-लम्पुरनगरे विंशति-तमे पूर्व एशिया शिखरसम्मेलनं सम्बोधयन् मन्त्री एतत् अवदत् । डॉ. जयशंकरः अवदत् यत् आतङ्कवादस्य विरुद्धं रक्षायाः अधिकारः सर्वोपरि वर्तते, तथा च सः वैश्विकसमुदायं आतंकवादस्य विरुद्धं सामूहिकरूपेण कार्यं कर्तुं आग्रहं कृतवान् ।

## शिवराज-खरीफ-क्रयणम् :

केन्द्रीयकृषि-कृषक-कल्याणमन्त्री शिवराजसिंहचौहानः ह्यः तेलङ्गाना, ओडिशा, महाराष्ट्र, मध्यप्रदेशेषु ऐषमः खरिफ-ऋतोः कृते पञ्चदश-सहस्रकोटिरूप्यकाणां क्रययोजनां अनुमोदितवान् । कृषि-कृषक-कल्याण-मन्त्रालयेन विज्ञप्तौ उक्तं यत् प्रधानमन्त्रि-अन्नदाता-आय-संरक्षण-अभियानस्य, तथा च मन्त्रालयस्य अन्य-योजनानां अन्तर्गतस्य उच्चस्तरीय-संगोष्ठिषु एतानि अनुमोदनानि प्रदत्तानि।

## यूएई- सेनापतियात्रा :

संयुक्त अरब अमीरातस्य भूसेनासेनानायकः मेजर जनरल यूसुफ मायूफ सईद अल हल्लामी इत्याख्यः भारतस्य आधिकारिकयात्रायां अस्ति । रक्षामन्त्रालयेन उक्तं यत् अस्य भ्रमणस्य उद्देश्यं, विशेषतः सेनायाः प्रशिक्षणे, क्षमतावर्धने, रक्षाप्रौद्योगिक्यां च द्विपक्षीयसैन्यसहकार्यस्य सुदृढीकरणं तथा च सहकार्यस्य नूतनक्षेत्राणां अन्वेषणं च वर्तते । भारत-यूएई-रक्षासम्बन्धेषु एषा यात्रा महत्त्वपूर्णा अस्ति तथा च द्वयोः राष्ट्रयोः गहनसहभागितां च प्रतिबिम्बयति।

## केरल-वर्षा अलर्टः

भारतीयऋतुविज्ञान-विभागेन केरलस्य षट्-मण्डलेषु महतीतः अत्यन्तं प्रचण्डवृष्टेः आरेंज्-अलर्ट इति नारंगवर्णीय-संचेतना प्रख्यापिता । पूर्वं कोझिकोड, कन्नूर, कासरगोड् च ऑरेन्ज अलर्ट इत्यस्मिन् समाविष्टाः आसन् । अधुना एरणाकुलम्, त्रिशूर, इडुक्की मण्डलानि अपि समाविष्टानि सन्ति । केरलस्य अवशिष्टानां अष्टानां मण्डलानां कृते पीतसंचेतना प्रख्यापिता अस्ति ।

## चेन्नै ओपन-

चेन्नैनगरस्य एस.डी.ए.टी. टेनिसक्रीडाङ्गणे ह्यः अविरामवृष्ट्याः कारणेन क्रीडायाः स्थगनम् अभवत् । ताः क्रीडाप्रतियोगिताः अधुना, अद्य द्वादश-वादनात् आरभ्य भविष्यन्ति ।